आ० - 28 × 15

पत्र - 1

कोट ड्रैंट

पोष्यंपरेद्दिने २८ वेदागमविरोधेन विवदन्तु द्विजोत्तमाः उपोष्या द्वादशी शुद्धा पक्षयोरुभयो
रपि २९ एवं वो निर्णयः प्रोक्तो मया शास्त्रविनिश्चयात् किमन्यच्छ्रोतुकामा स्थ तद्भवंतो ब्रुवंतु
मे ऋषय ऊचुः पुराणादीनां विधिस्त्वत्तु वदस्व वदतांवर ३० एवं संग्राममुख्यानां नानावेद्यं विद्यते तेन व
सूत उवाच दृष्टमुन्मेदंतया क्रमं पुराणाद्या कवयो विदुः शुक्ले पूर्वाह्णिके ग्राह्यो क्रमेचैवाप
राह्णिके ३२ अयनं दिन भोगाद्यं संक्रमं षोडशी कला पूर्वा दक्षिणे भागे स्यात्तिर्थे चोत्तरायणे
३३ मध्यकाले तु विषुवत् प्रक्षयः परिकीर्तितः ज्ञात्वा तिथिं नरः सम्यक् संवत्सरमुदीरये
त् ३४ कर्तव्यमुपवासं तु अन्यथा नरकं व्रजेत् एकादशी द्विजश्रेष्ठाः पक्षयोरुभयोरपि
तिथिं विद्धामकुर्वाणो नरो धर्म्मेनिकृतति: संततेश्च विनाशाय संपदाहरणाय च यदा वि
द्धा तु विप्रेंद्रा द्वादशी स्यैकादशी भवेत् सुरपादिं दुनास्पृष्टं गंगांभश्च संपतेत् एकादशी द्वि
जश्रेष्ठा पक्षयोरुभयोरपि ३५ पूर्वविद्धा परा ज्ञाति तिथि सा कुशाके तु नादानवे भ

४

ना०पु० श्रेष्ठाप्रीणान्तीर्थमहात्मना ॥ अकाले यद्भवेद्दत्तं न पात्रे च द्विजोत्तमा ॥ सक्रोधश्चैव यद्दत्तं प

परतं स्यात्सलूतं ३९ पूर्वविद्धातिथौ दत्तं तद्दत्तमसुरेष्ववै तस्माद्विप्रा न पूर्वविद्धा कर्त्तव्या द्वादशीत्व वि

न् ४० यदेकवाससा दत्तं यद्दत्तं जलवर्जितं पुनः कीर्तनसंयुक्तं तद्दत्तमसुरेष्ववे ४१ विद्धा

हंति परं पुण्यं श्राद्धं च पृथ्वीपते जप्तं दत्तं हुतं स्नातं तत्पापं नाक्रता हरे तिथिविद्धस्य पंयो

ति तमः सूर्योदये यथा जीर्णपतिं यौवनगर्विता यथा त्यजंति नार्यो ऋद्धषकेनु नार्दिता

नयाद्दिविद्धां विबुधा सजंति तिथिं नरा धर्मविविद्धपे सदा ४३ इति श्रीनारदीयपुराणे रु

क्मांगदोपाख्याने तिथिवरणे नाम द्वितीयोध्यायः २ ऋषय ऊचुः ॥ विस्तरेण समाख्याहि वि

ष्णोराराधनं क्रियां यथा संतोषमायाति ददाति प्रसमीहितं १ लक्ष्मीभर्ता जगन्नाथो ह्यशेषाघ

घनाशनः करोति भगवान्विष्णुस्तन्मे विस्तरतो वद २ सूत उवाच भक्तिग्राह्यो हृषीकेशो न

धनैरूरसंचयैः भक्त्या संपूजितो विष्णुः प्रददाति समीहितं ३ तस्माद्विप्राः सदा भक्तिः कर्तव्या चक्र

पाणिनः जलेनापि जगन्नाथः पूजितः क्लेशहा हरिः ४ परितोषं व्रजत्याशु तृषार्तो वारिणा यथा ५

ना०पु०

आकार — 20 X 15

पत्र — 1

रविशशियुक्तः शशिजः सौम्यादृष्टो विनाशयति नूनं एकादशभिर्वर्षैर्देवं केपि स्थितं जातं
४५ लग्ने रविसौरिकुजैः शत्रुगृहे सप्तमे शशी क्षीणः दृष्टो न देवगुरुणा सप्तभि रब्दैर्वि
नाशयति ४६ केंद्रे रविमखिलतनुः क्षितिसुतमंदावलोकितो युतः वर्षद्वयेन चं
द्रो मारयति किमत्र गणनेन ४७ लग्नाधिपतिश्चंद्रो मरणपदस्यो निकृन्तनांशा
नः क्रूरैः सकलैर्दृष्टो न शुभैर्वर्षैः स्वभिः मृत्युः ४८ लग्नाधिपतिः पापः शशिनो
शेरिष्ययोगो यदि चंद्रात् क्रूरैर्विलोक्यमानो मारयति शुभं नवभिरब्दैः ४९ दर्शनभा
गे सौम्याः क्रूराश्च दृश्यगाः प्रसवकाले राहुर्लग्नोपगतो यमद्वयं नयति पंचभिर्व
र्षैः ५० राहुः सप्तमभवने शशिसूर्यनिरीक्षितो न शुभदृष्टः दशभिर्द्वाभ्यां सहितैरब्दै
नं ५ र्जातं विनाशयति ५१ सिंहघटवृश्चिकोदयनस्थितिर्जीवितं हरति राहुः पापैर्निरीक्ष्यमा
णः सप्तमितैर्निश्चितं वर्षैः ५२ केतोरुदयः पूर्वं पश्चादुल्कातिपवननिर्घातैः रौद्रे संध्य
मुहूर्ते प्राणैः संत्यज्यते जातः ५३ क्षीणं यदा शशांकं पश्येद्द्वादशमगैः क्रूरैः मारय
ति तदा दिवसैर्निश्चयेनैकपर्येरेव ५४ कुंभे दिशातिश शशांको भागे मत्स्ये तथैकविंशे च
सिंहे च पंचमे शोवृषे च नवमे च नवमे वार्कः ५५ अलिनि त्रिविंशति युक्ते मेषे च तथाष्ट
मे दिशन्ति मृत्युं कर्कटके द्वाविंशे तुलिनि चतुर्थे मृगे विंशे ५६ कन्यायां प्रथमे प्रोधनु
षेष्टादशे ऋषभे दशमे मिथुने च द्वाविंशे शशी प्रसूतस्य मरणकरः ५७ याम्यकाः शशि

सा॰ व॰ नौशाजन्मनि वर्षैर्गृहे तैस्फला वह्निः मरणं हि जन्मभाजामपमृत्युकवज्ञरक्षाणाम् ५८॥
१५ इति श्री मत्कल्प विरचितायां सारावल्यां रिष्टाध्यायो नवमः ९ संभूतारिष्टानां भंगालेखाय
यावदिष्टो गे तासां गमतोवदेप्रधाना भूतायतस्ते च १ उडुपति कृत रिष्टानां भंगस्ता वा
न्निनुच्यते सहिते शास्त्राणामपि पश्चात् यथा मतं वृद्ध पूर्वाणां २ सर्वैर्गगनभ्रमणैर्दृ
ष्टश्चंद्रो विनाशयति रिष्टं अपूर्णमाणमरिमियथान्नपः स्वल्पपहेषी ३ चंद्रः संपूर्णत
नुः शुक्रेण निरीक्षितः सुहृद्भागे कष्टहराणां श्रेष्ठो वातहराणां यथा बस्ति ४ परमोच्चो
पि शिरतनुभृगुतनय निरीक्षितो हरति रिष्टं सम्यग्विरेचवमनं पित्तकफान्तियथा
शेषं ५ चंद्रे शुभभागे हस्थः क्षीणोपि शुभेक्षितो हरति रिष्टं जलमवमहाति सारजाति
फलं वल्कलंकुपितं ६ सप्ताष्टमवर्षस्थाः शशिनः सौम्या हरति कष्टफलं पापैरमिश्रचा
राः कल्याणवृत्तयो स्वाद्धा ७ शुक्रः शुभफलदायि मिरिडः सर्वे निहंति रिष्टानि
तेषामेव अंशेलवणं श्रुतिपूरणं वनयनमूलं ८ अपूर्णापि मा मूर्ति द्वादशभागे
शुभस्य यदि चंद्रः रिष्टं नयति विनाशं तस्करो ब्राह्मणो यथा गुदजं ९ सौम्य दृक्कोचंद्रो द्रे
ष्पतिना विलोकितो हंति रिष्टं निरीक्षितो न्यैः कुलांगना कुलमिवान्यगता १०
क्रूरभवने शशांको शुभ निरीक्षितस्तद नुवर्गे रक्षितः शिशुं प्रजापति कृपण मिव ध
नं प्रयत्नेन ११ उदितावपनि चंद्रः सर्वा रिष्टान्यपनयति विनाशं क्षीरोदग्नि जन्म १५

सर्वस्नानानंतरं स्व कल्प

उ. ॐ गणपतये नमः उपनयनाभिधप्रारंभः तत्र शुद्धसमये रविगुरुचन्द्रतारादिशुद्धौ गर्भाष्टमेऽष्टमे वर्षे वा अनुकूले
१ षोडशसंवत्सराभ्यंतरे ब्रह्मवर्चसकामः पंचमे उत्तरायणे आपूर्य्यमाणपक्षेऽनध्यायषष्ठीरिक्तादिरिक्ततिथौ
त रविचंद्रबुधशुक्रगुर्वान्यतमे वारे मध्याह्नादर्वाक् कुमारपित्राभ्युदयिके कृते तेनैवाचार्य्येणैव कृते ८
घि ब्राह्मणान्माणवकं भोजयित्वा सशिखकृतक्षौरं स्नानानंतरं यथाशक्त्यलंकृतं कृत्वा बहिः शालायां तु पंकश
र्करादिरहितायां शुद्धपरिस्कृतभूमावाचार्योऽग्निस्थापनं कुर्यात् तत्र हस्तमात्रपरिमितचतुरस्रं कुशैः
करणकभूमौ समूहनानंतरं गोमयोदकेनोपलिप्य स्रुवमूलेन प्रागग्रं प्रादेशमात्रमुत्तरोत्तरक्रमेण त्रिरु न
२५८ ल्लिख्य उल्लेखनक्रमेणानामिकांगुष्ठाभ्यां मृदमुद्धृत्य जलेनाभ्युक्ष्य नवीनकांस्यपात्रेणाग्निमानाय्य स्वाभिमुखं निद
ध्यात् ततः कुमारमाचार्य्यः शिष्यद्वाराग्नेः पश्चाद्दक्षिणपार्श्वे स्थापयति ततः कुमारं बद्धांजलिं संबो
धयति ब्रह्मचर्य्यमागामिति ब्रूहि इति प्रेषानंतरं ॐ ब्रह्मचर्य्यमागामिति कुमार आह ॐ ब्रह्मच
र्य्यसानीति ब्रूहि इति आचार्येणोक्ते ॐ ब्रह्मचर्य्यसानीति कुमार आह अथ माणवकमाचार्य्यो वा
सः परिधापयति तत्र आचार्यपठनीयो मंत्रः ॐ येनेंद्राय बृहस्पतिर्वासः पर्यदधादमृतं तेन त्वा परि

ॐ येनेंद्रायेत्यंगिरा ऋषिर्बृहस्पतिर्देवता वासः परिधापने विनियोगः
त्रिष्टुप् छंदः

पूरयति ओंआपोहिष्ठामयोभुवस्तानऊर्ज्जेदधातनमहेरणायचक्षसेयोवः शिवतमोरसस्तस्यभाजयते
हनःउशतीरिवमातरःतस्माअरंगमामवोयस्यक्षयायजिन्वथआपोजनयथाचन इतितिसृभिः ततः
सूर्य्यमुदीक्षस्वेत्याचार्यप्रेरणानन्तरं ओंतच्चक्षुर्देवहितंपुरस्ताच्छुक्रमुच्चरत् पश्येमशरदःशतंजी
वेमशरदःशतं शृणुयामशरदःशतं प्रब्रवामशरदःशतमदीनास्यामशरदःशतं भूयश्चशर
दःशतात् इत्यनेनादित्यंपश्यति अथकुमारस्यदक्षिणांसमंहृदयंदक्षिणहस्तेनस्पृशन्त्या
चार्यः ओंममव्रतेतेहृदयंदधामिममचित्तमनुचित्तंतेअस्तुममवाचमेकमनाजुषस्वबृहस्प
तिस्त्वानियुनक्तुमह्यमितिमन्त्रेण ततःकुमारस्यदक्षिणहस्तंगृहीत्वातंपृच्छति कोनामासित्य
अमुकशर्माहंभोइतिकुमारआह कस्यब्रह्मचार्यसीत्याचार्यः भवतःइतिकुमारआह पु
ब्रह्मचार्य्य सो५३ नराचार्योभाषते ओंइन्द्रस्याग्निराचार्यस्तवाहमाचार्यस्तवाहमाचार्योऽमुकशर्मणः अयमा
णवकंबद्धाञ्जलिंपूर्वादिदिक्चतुष्टयदक्षिणमुपस्थानंकारयति तत्राचार्यस्यमंत्रपाठः ओंप्रजा
पतयेत्वापरिदधामिइतिप्राच्यां ओंदेवायत्वासवित्रेपरिदधामीतिदक्षिणस्यां ओंअद्भ्यस्त्वौष

ब्रह्मा
इयं दुरुक्तमिति वामदेव ऋषिः प्रजापतिर्देवता त्रिष्टुप् छंदः मेखलापरिधाने विनियोगः ४

दधाम्यायुषे दीर्घायुत्वाय बलाय वर्चसे ततो माणवकस्य द्विराचमनं अथ माणवकस्य वेष्टनत्रयेण प्रवरग्रन्थि
युतां कृत्वा मेखलामाचार्यो बध्नाति तत्र माणवकपठनीयो मंत्रः ओं इयं दुरुक्तं परिबाधमाना वर्णं पवि
त्रं पुनती म आगात् प्राणापानाभ्यां बलमादधाना स्वसा देवी सुभगा मेखलेयं ओं युवा सुवासाः परिवी
त आगात् स उ श्रेयान् भवति जायमानः तं धीरासः कवय उन्नयंति स्वाध्यो मनसा देवयंतः इति वार
त्रयं ततः आचार्यो यज्ञोपवीतसहितमांडष्टकं ब्राह्मणेभ्यो दत्वा ओं यज्ञोपवीतमिति परमेष्ठिऋषिर्लिंगो
क्तो देवता त्रिष्टुप् छंदः उपवीतपरिधाने विनियोगः अर्द्धयज्ञोपवीतपरिधानं ततो यज्ञोपवीतं पर
िदधाति माणवकः तत्राचार्येण पठनीयो मंत्रः ओं यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्ता
त् आयुष्यमग्र्यं प्रतिमुंच शुभ्रं यज्ञोपवीतं बलमस्तु तेजः इति मंत्रेण ततः पैण्यमजिनं तूष्णीं परि
धत्ते ततो माणवककेशपरिमितपलाशदंडमाचार्यस्तूष्णीं तस्मै प्रयच्छति तं च ओं यो मे
दंडः परापतद्वैहायसोऽधि भूम्यां तमहं पुनराददे आयुषे ब्रह्मणे ब्रह्मवर्चसाय इति मंत्रेण मा
णवको गृह्णाति ततः आचार्यो वारिणा स्वमंजलीं पूरयित्वा कुमारस्यांजलिं तेनैवांजलिजलेन

पालाशदंडं ब्राह्मणस्य वैल्वो राजन्यस्य औदुंबरो वैश्यस्य वैणवं सर्वेषां

द्वयोर्मध्ये मंत्रैकस्य पाठः = ततो यज्ञोपवीतं परिदधाति माणवकः ४

ओं यो मे दंडः इति प्रजापतिर्ऋषिः ... दंडग्रहणे विनियोगः

३

३ स्रुः स्रुवः आज्यं षट्पंचाशदुत्तरद्व्यर्घ्यमुष्टिप्रमाणद्वयावच्छिन्नतंडुलपूर्णपात्रं पवित्रछेदनकुशानां 5
पूर्वपूर्वदिशि क्रमेणासादनीयं ततः पवित्रच्छेदनकुशैः पवित्रे छित्वा सपवित्रकरेण प्रणीतोदकं त्रिः प्रोक्षणीपा
त्रे निधायानामिकांगुष्ठाभ्यां पवित्रे उत्तराग्रे गृहीत्वा त्रीरुत्पूय प्रोक्षणीपात्रं वामकरेणाधायानामिकांगु
ष्ठाभ्यां गृहीतपवित्राभ्यां तज्जलं किंचित्त्रिरुद्दिंग्य प्रणीतोदकेन प्रोक्षणीं त्रिरभिषिंच्य प्रोक्षणीजलेना
सादितवस्तुसेचनं कृत्वाऽग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रं निदध्यात् आज्यस्थाल्यामाज्यं निरूप्याधि
श्रयणं ततः कुशं प्रज्वाल्याज्योपरि प्रदक्षिणं भ्रामयित्वा वह्नौ तत्प्रक्षिप्य स्रुवं त्रिः परितप्य संमार्जनं
कुशानामग्रैरंतरतो मूले बाह्यतः स्रुवं संमृज्य प्रणीतोदकेनाभ्युक्ष्य पुनस्त्रिः परितप्य दक्षिणतो नि
दध्यात् ततः आज्यमग्नेरवतार्य त्रिः प्रोक्षणीवदुत्पूयावेक्ष्य सत्यपद्रव्ये तन्निरसनं कृत्वा पुनः प्रोक्षणी
वदुत्पूय ततः उत्थायोपयमनकुशान् वामहस्ते कृत्वा प्रजापतिं मनसा ध्यात्वा तूष्णीं घृताक्ताः समि
धस्तिस्रः प्रक्षिपेत् उपविश्य सपवित्रप्रोक्षण्युदकेन प्रदक्षिणक्रमेणाग्निं पर्युक्ष्य प्रणीतापात्रे पवि
त्रे निधाय पातितदक्षिणजानुर्ब्रह्मणान्वारब्धः समिद्धतमेऽग्नौ स्रुवेणाज्याहुतीर्जुहोति तत्र तत्र ३

धिभ्यः परिददामीति प्रतीच्यां ॐ द्यावापृथिवीभ्यां त्वां परिददामीत्युदीच्यां ॐ विश्वेभ्यस्त्वा देवेभ्यः परिददा
मीत्यधः ॐ सर्वेभ्यस्त्वा भूतेभ्यः परिददामीत्युपरिष्टात् ततोऽग्निं प्रदक्षिणीकृत्याचार्यदक्षिणदिशि उपविशति मा
णवकः ततः पुष्पचंदनताम्बूलवासांस्यादाय ततः ॐ अद्यकर्त्तव्योपनयनहोमकर्मणि कृताकृ
तावेक्षणरूपब्रह्मकर्मकर्त्तुममुकगोत्रममुकशर्माणं ब्राह्मणमेभिः पुष्पचंदनताम्बूलवासोभि
र्ब्रह्मत्वेन त्वामहं वृणे इति ब्राह्मणं वृणुयात् ॐ वृतोस्मीति प्रतिवचनं यथाविहितं कर्म कुर्वीत्या
चार्येणोक्ते ॐ करवाणीति प्रतिवचनानंतरं ब्रह्मणेऽग्नेर्दक्षिणतः शुद्धमासनं दत्वा तदुपरि प्रागग्रान्कुशान्स्तीर्या
ग्निं प्रदक्षिणं कारयित्वाऽस्मिन्कर्मणि त्वं मे ब्रह्मा भवेत्यभिधाय ॐ भवानीति तेनोक्ते तदुपरि ब्राह्मणमुदङ्मु ने।
खमुपवेश्य ततः प्रणीतापात्रं पुरतः कृत्वा वारिणा परिपूर्य कुशैराच्छाद्य ब्रह्मणो मुखमवलोक्याग्नेरुत्तरतः
कुशोपरि निदध्यात् ततः परिस्तरणं बर्हिषश्चतुर्थभागमादायाग्नेयादीशानान्तं ब्रह्मणोऽग्निपर्यन्तं नैरृत्या
द्वायव्यान्तं अग्नितः प्रणीतापर्यन्तं ततोऽग्नेरुत्तरतः पश्चिमदिशि पवित्रच्छेदनार्थं कुशत्रयं पवित्रार्थं साग्र
मनंतर्गर्भं कुशपत्रद्वयं प्रोक्षणीपात्रमाज्यस्थाली संमार्जनार्थं कुशत्रयं उपयमनकुशाः समिधस्तिस्र

३

४ कृते स्वाहा इदमग्नये स्विष्टकृते इति स्विष्टकृत् ततः संस्रवप्राशनं आचम्य ततो ब्रह्मणे दक्षिणा ॐ अद्य
तस्मिन्नुपनयनहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थमिदं पूर्णपात्रं प्रजापतिदैवतममुकगोत्रा
यामुकशर्मणे ब्राह्मणाय दक्षिणां तुभ्यमहं संप्रददे इति दक्षिणां दद्यात् ॐ स्वस्तीति प्रतिवचनं ततो ब्रह्मग्रंथि
विमोकः ॐ सुमित्रिया न आप ओषधयः सन्त्विति पवित्राभ्यां जलमानीय तेन शिरः संमृज्य ॐ दुर्मित्रियास्त
स्मै संतु योऽस्मान् द्वेष्टि यं च वयं द्विष्मः इत्यैशान्यां प्रणीतान्युब्जीकरणं ततः आस्तरणक्रमेण बर्हिः कृत्वा
प्य घृतेनाभिघार्य हस्तेनैव जुहोति ॐ देवा गातुविदो गातुं वित्वा गातुमित मनसस्पत इमं देव यज्ञं स्वा
हा वाते धाः स्वाहा इति बर्हिर्होमः आचार्यः कुमारस्यानुशासनं करोति ॐ ब्रह्मचार्यसीत्याचार्यः ॐ
असानीति कुमार आह ॐ आपोऽशानेत्याचार्यः ॐ अश्नानीति कुमारः कर्म कुर्वित्याचार्यः ॐ
करवाणीति कुमारः मा दिवा स्वाप्सीरित्याचार्यः ॐ न स्वपामीति कुमारः ॐ वाचं यच्छ इत्याचार्यः ॐ यच्छामी
ति कुमारः ॐ समिधमाधेहि इत्याचार्यः ॐ आदधानीति कुमारः ॐ आपोऽशान इत्याचार्यः ॐ अश्ना
नीति कुमारः अथाग्नेरुत्तरतः प्रत्यङ्मुखायोपविष्टायाचार्यचरणोपसंग्रहणपूर्वकमुपसन्नाचा ४

दाहृत्स्नंसमरेश्रुवावस्थितघृतशेषस्यप्रोक्षणीपात्रेप्रक्षेपः ओंप्रजापतयेस्वाहा इदंप्रजापतये इतिमनसा ओंइ
न्द्रायस्वाहा इदमिन्द्राय इत्याघारौ ओंअग्नयेस्वाहा इदमग्नये ओंसोमायस्वाहा इदंसोमाय इत्याज्यभागौ 8
ओंभूःस्वाहा इदंभूः ओंभुवःस्वाहा इदंभुवः ओंस्वःस्वाहा इदंस्वः एतामहाव्याहृतयः ओंत्वन्नोअग्नेवरुण
स्यविद्वान्देवस्यहेडोअवयासिसीष्ठाः यजिष्ठोवह्नितमःशोशुचानोविश्वाद्वेषांꣳसिप्रमुमुग्ध्यस्मत्स्वा
हा इदमग्निवरुणाभ्यां ओंसत्वन्नोअग्नेवमोभवोतीनेदिष्ठोअस्याउषसोव्युष्टौअवयक्ष्वनोवरुणꣳरर
णोवीहिमृडीकꣳसुहवोनएधिस्वाहा इदमग्निवरुणाभ्यां ओंअयाश्चाग्नेस्यनभिशस्तिपाश्चसत्वमि
त्वमयाअसिअयानोयज्ञंवहास्ययानोधेहिभेषजꣳस्वाहा इदमग्नये ओंयेतेशतंवरुणायेसहस्रंय
ज्ञियाःपाशावितताम्महान्तः तेभिर्नोअद्यसवितोतविष्णुर्विश्वेमुञ्चन्तु मरुतःस्वर्काःस्वाहा इ
दंवरुणायसवित्रेविष्णवेविश्वेभ्योदेवेभ्योमरुद्भ्यः स्वर्केभ्यः ओंउदुत्तमंवरुणपाशमस्मदवाधमंविम
ध्यमꣳश्रथाय अथावयमादित्यव्रतेतवानागसोअदितयेस्यामस्वाहा इदंवरुणाय एताः
सर्वाःप्रायश्चित्तसंज्ञकाः ओंप्रजापतयेस्वाहा इदंप्रजापतयेइतिमनसाप्राजापत्यं ओंअग्नयेस्विष्ट

उ
५ मेपाहि ॐआयुर्दाअग्नेस्यायुर्मेदेहि ॐवर्चोदाअग्नेसिवर्चोमेदेहि ॐअग्नेयन्मेतन्वाऊनंतन्मआपृण ॐमे
धांमेदेवः सविताआदधातु ॐमेधांमेदेवीसरस्वतीआदधातु ॐमेधांमेअश्विनौदेवावाधत्तांपुष्करस्र
जौ ततः सर्वगात्रादिषुदक्षिणपाणिनास्पर्शः अत्रप्रत्येकंमंत्र ॐअंगानिचमआप्यायंतां इतिसर्वगात्रा
लंभने ॐवाक्चमआप्यायतामितिमुखालंभने ॐप्राणश्चमआप्यायतामितिनासिकयोः ॐचक्षुश्च
मआप्यायतामितिचक्षुषो ॐश्रोत्रंचमआप्यायतामितिश्रोत्रे ॐयशोबलंचमआप्यायतामितिमंत्र
पाठमात्रं ततोदक्षिणकरानामिकाग्रगृहीतभस्मनाललाटेग्रीवायांदक्षिणबाहुमूलेहृदिचत्र्यायु
षंकुर्यात् तत्रयथासंख्येनमंत्रचतुष्टयं ॐत्र्यायुषंजमदग्नेः ॐकश्यपस्यत्र्यायुषं ॐयद्देवेषुत्र्या
युषं ॐतन्नोअस्तुत्र्यायुषं ततोव्यस्तपाणिभ्यांपृथिवीस्पर्शनाभिनंकुर्यात् तत्रप्रकारः ॐअमुकगो वादनं ५
हंअमुकप्रवरोहममुकशर्माहंभोवैश्वानरत्वामभिवादये ततोनेनैवक्रमेणसंबोध्यवरुणमामेवाद्या
चार्यंतथैवाभिवादयेत् आयुष्मान्भवसौम्येइत्याचार्योब्रूयात्ततोभिक्षापात्रमादाय प्रथमंमातुः
सकाशात् ॐभवतिभिक्षांमेदेहि इतिप्रार्थनानंतरंतद्दत्तांचादायाचार्यायनिवेदयेत् तथैवमि तमः ५

ध्यैसमील्लक्षणायाचार्य्यः स्वयमपि मपि समीक्षितायास्मै निवारितं शंखतूर्य्यादिशब्द इद्धांसके गायत्रीमन्वाह तत्रप्रथमादौ
ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ॐ पुनर्वारद्वयं अत्रतु सहपाठो विशेषः अमाणव य
कश्चाचार्य दक्षिणदिशि अग्निपश्चिमोपविश्य घृताक्तस्रुक्क निषिद्धेतरेंधनेन जुहुयात् ततः ॐ अग्ने सुश्रवः सुश्रवसं माकुरु
ॐ यथा त्वमग्ने सुश्रवः सुश्रवा असि ॐ एवं मां सुश्रवः सौश्रवसं कुरु ॐ यथा त्वमग्ने देवानां यज्ञस्य निधिपा असि एवमहं
८ मनुष्याणां देवस्य निधिपो भूयासं ततः प्रदक्षिणमग्निं वारिणा पर्युक्ष्य उत्थाय स्वप्रादेशमितां घृताक्तपलाशसमिधमा
पे दध्यात् ॐ अग्नये समिधमाहार्षं बृहते जातवेदसे यथा त्वमग्ने समिधा समिध्यस एवमहमायुषा मेधया वर्चसा ध
सा प्रजया पशुभिर्ब्रह्मवर्चसेन समिंधे जीवपुत्रो ममाचार्यो मेधाव्यहमसान्यनिराकरिष्णुर्यशस्वी तेजस्वी ब्रह्म
वर्चस्यन्नादो भूयासं स्वाहा इति मन्त्रेण जुहुयात् एवं समिद्द्वितयं जुहुयात् उपविश्य घृताक्तस्रुक्क निषिद्धेत
रेंधनेन पंचाहुतीर्जुहुयात् ॐ अग्ने सुश्रवः सुश्रवसं माकुरु ॐ यथा त्वमग्ने सुश्रवः सुश्रवा असि ॐ एवं मां
सुश्रवः सौश्रवसं कुरु ॐ यथा त्वमग्ने देवानां यज्ञस्य निधिपा असि ॐ एवमहं मनुष्याणां देवस्य निधिपो
भूयासं ततः प्रदक्षिणमग्निं पर्य्युक्ष्य तूष्णीं पाणी प्रतप्य मुखं प्रतिमंत्रेणैव मृशति ॐ तनूपा अग्नेसि तन्वं

उ.न
६

ओं

दाय ओं अद्य कर्त्तव्यवेदारंभहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्म कर्त्तुं अमुकगोत्रममुकशर्माणं ब्रा
ह्मणमेभिः पुष्पचंदनताम्बूलवासोभिर्ब्रह्मत्वेन त्वामहं वृणे इति ब्रह्माणं वृणुयात् वृतोस्मीति प्रतिवचनं ओं
यथाविहितं कर्म कुर्विति तमभिधाय ओं करवाणीति तेनोक्ते अग्नेर्दक्षिणतः शुद्धमासनं दत्वा तदुपरि प्रागग्रा
न्कुशानास्तीर्याग्निं प्रदक्षिणक्रमेण भ्रामयित्वा ओं अस्मिन्कर्मणि त्वं मे ब्रह्मा भव ओं भवानीति ते
नोक्ते ब्राह्मणमुदङ्मुखं तत्रोपविश्य प्रणीतापात्रं पुरतः कृत्वा वारिणा परिपूर्य्य कुशैराच्छाद्य ब्रह्मणो मु
खमवलोक्याग्नेरुत्तरतः कुशोपरि निदध्यात् ततः परिस्तरणं बर्हिषश्चतुर्थभागमादायाग्नेयादीशानान्तं
ब्रह्मणोऽग्निपर्य्यन्तं नैरितादायव्यान्तं अग्नितः प्रणीतापर्यन्तं ततोऽग्नेरुत्तरतः पश्चिमदिशि पवित्रच्छेद
र्थं कुशत्रयं पवित्रकरणार्थं साग्रमनन्तर्गर्भं कुशपत्रद्वयं प्रोक्षणीपात्रमाज्यस्थाली संमार्जनकुशाः
उपयमनकुशाः समिधस्तिस्रः स्रुवः आज्यं ... पात्रं पवित्रच्छेदनकुशानां पूर्वपूर्वदिशि दिशि क्रमेणा
सादनीयं ततः पवित्रच्छेदनकुशैः पवित्रे छित्वा सपवित्रकरेण प्रणीतोदकं त्रिः प्रोक्षणीपात्रे निधाय
द्वाभ्यामनामिकांगुष्ठाभ्यामुत्तराग्रे पवित्रे गृहीत्वा त्रिरुत्पवनं ततः प्रोक्षणीपात्रं वामहस्ते कृत्वा दक्षि
णहस्तानामिकांगुष्ठाभ्यां त्रिरुद्दिंगनं ततः प्रणीतोदकेन प्रोक्षणीपात्रमभ्युक्ष्य प्रोक्षणीजलेनासा
दितवस्तुसेचनमग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रं निदध्यात् ततः आज्यस्थाल्यामाज्यनिर्वापः अधि
श्रयणं ततः कुशं प्रज्वाल्याज्यस्याग्नेश्चोपरि प्रदक्षिणं भ्रामयित्वा चाग्नौ तत्प्रक्षेपः ततस्त्रिः स्रुवप्रतप
नं संमार्जनकुशाग्रैरन्तरतो मूलैर्बाह्यतः स्रुवं संमृज्य प्रणीतोदकेनाभ्युक्ष्य पुनस्त्रिः प्रतप्य ६

ततः ती

क्षांतरं याचेत् आचार्येण भुङ्क्ष्वेत्यनुज्ञातो भिक्षां स्वीकुर्यात् ततः फलपुष्पघृतपूर्वकं वेणा ब्रह्मचारिदक्षिण
करस्पृष्टेनाचार्यः पूर्णाहुतिं दद्यात् तत्र मंत्रः ओं मूर्द्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आजातम
ग्निं कविंꣳ सम्राजमतिथिं जनानामासन्ना पात्रं जनयंत देवाः स्वाहा इदमग्नये ततः स्रुवेण भस्मानीय
दक्षिणानामिकाग्रगृहीतभस्मना ओं त्र्यायुषं जमदग्नेरिति ललाटे ओं कश्यपस्य त्र्यायुषमिति ग्रीवायां ओं यद्दे
वेषु त्र्यायुषमिति दक्षिणबाहुमूले ओं तन्नो अस्तु त्र्यायुषमिति हृदि इति त्र्यायुषं कुर्यात् कुमारपक्षे तन्नो
इत्यस्य स्थाने तत्ते इति विशेषः अथ क्षारलवणं मधुमांसादिनिवृत्तिः उद्वर्तनजलस्नान दण्डकाजि
नधारणं छत्रारोहणविषमभूमिलंघन नग्नस्त्रीनिरीक्षण स्त्रीसंभोगव्यसन व्याहृतिरूपा ब्रह्मचारिणो
नियमाः तद्दिने ब्रह्मचारी वाग्यतोहः शेषं स्थितः एवगमयेत् ततः सायं संध्यां कृत्वा तस्मिन्नेवाग्नौ
पूर्ववत्पर्युक्षणपरिसमूहने कृत्वा वाचं विसृजेत् परिसमूहनं तु शुष्कनिषिध्येतरेंधनैस्त्वाग्नौ प्रक्षेपः ततः सं
ध्यामुपास्य प्रतिदिनं सायं प्रातरपि ब्रह्मचारिणा कर्त्तव्यः अथ वेदारंभः तत्र कृतनित्यक्रिय आचार्यः
कुशैर्हस्तमात्रपरिमितं चतुरस्रां भूमिं कुशैः परिसमुह्य तान्कुशानैशान्यां परित्यज्य गोमयोदकेनो
पलिप्य स्रुवमूलेनोत्तरतः प्रागग्रं प्रादेशमात्रं त्रिरुल्लिख्य उल्लेखनक्रमेणानामिकांगुष्ठाभ्यां मृदमु
द्धृत्य जलेनाभ्युक्ष्य कांस्यपात्रेणाग्निमानीयाभिमुखमुपसमाधाय पुष्पचंदनतांबूलवस्त्राणा

८ सोमस्वाहा इदं वरुणाय इतिसर्वप्रायश्चित्तं ॐ प्रजापतये स्वाहा इदं प्रजापतये इति मनसा ॐ अग्नये स्विष्टकृते
स्वाहा इदमग्नये स्विष्टकृते ततः ततः संस्रवप्राशनं आचम्य ॐ अद्य च कृतैतद्धवारंभ होमकर्मणि कृताकृतावे
क्षणरूपब्रह्मकर्मप्रतिष्ठार्थं इदं पूर्णपात्रं प्रजापतिदैवतं अमुकगोत्रायामुकशर्मणे ब्राह्मणाय दक्षिणात्वेन तुभ्यम
हं संप्रददे इति दक्षिणां दद्यात् ॐ स्वस्ति प्रतिवचनं ततो ब्रह्मग्रंथिविमोकः ॐ सुमित्रिया न आप ओषधयः सन्तु
इति पवित्राभ्यां प्रणीताजलमानीय तेन शिरः संमृज्य ॐ दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्मः इति
मंत्रेण प्रणीतान्युब्जीकरणम् ततः स्तरणाक्रमेण बर्हिरानीय घृतेनाभिघार्य हस्तेनैव जुहुयात् ॐ देवा गातु
विदो गातुं वित्वा गातुमित मनसस्पत इदं देवयज्ञं स्वाहा वाते धाः स्वाहा वाते धाः स्वाहा इति बर्हिर्होमः ततः
काश्मीरगमनम् ततः इह्यासके वेद्यारंभं गुरू कारयेत् तत्र क्रमः ॐ भूर्भुवः स्वः ॐ तत्सवितुर्वरेण्यं भर्गो दे
वस्य धीमहि धियो यो नः प्रचोदयात् ॐ इति प्रणवांतं पठित्वा पंक्तिं नमस्कारं च कारयेत् ॐ समिधाग्निं दुव
स्यत घृतैर्बोधयतातिथिं आस्मिन् हव्या जुहोतन सुसमिद्धाय शोचिषे इति कांडकांतरवापाठयेत् ततः स
प्रणवं स्वस्तिवाचयित्वा ततो उत्थाय फलपुष्पसमन्वितं स्रुक्चारि दक्षिणकरस्पृष्टेन स्रुवेणाघृतेन
पूर्णाहुतिं दद्यात् ॐ मूर्द्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आजातमग्निं कविं संम्राजमतिथिं जनाना
मासन्नापात्रं जनयंत देवाः स्वाहा इति पूर्णाहुतिः ततः उपविश्य स्रुवेण भस्मानीय दक्षिणानामिकाग्रगृ
हीतभस्मना ॐ त्र्यायुषं जमदग्नेरिति ललाटे ॐ कश्यपस्य त्र्यायुषं इति ग्रीवायां ॐ यद्देवेषु त्र्यायुषं इति दक्षि ब
णबाहुमूले ॐ तन्नो अस्तु त्र्यायुषमिति हृदि अनेनैव क्रमेण ब्रह्मचारि ललाटे पि तत्तत्स्थले ८ 13

श्रि

क्षिणतो निदध्यात् ततस्त्रातमप्रदक्षिणं कारयित्वा बतार्याग्नेर्निदध्यात् ततः आज्ये प्रोक्षणीवदुत्पवनं स्रुवे ... निरस 14
नं कृत्वा ततः प्रोक्षस्रुत्पवनं ततः उत्थायोपयमनकुशानादाय प्रजापतिं मनसा ध्यात्वा तूष्णीमग्नौ समिधः प्रक्षिपेत् ततउपविश्य
सपवित्रप्रोक्षण्युदकेन प्रदक्षिणक्रमेणाग्निं पर्युक्ष्य प्रणीतापात्रे पवित्रे निधाय ब्रह्मणान्वारब्धः पातितदक्षिणजानुः समिद्धत
मेऽग्नौ जुहुयात् तत्र पूर्वमाहुतिचतुष्टयेन स्रुवावस्थितहुतशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः ओं प्रजापतये स्वाहा इदं प्रजाप
तये इति मनसा ओं इन्द्राय स्वाहा इदमिन्द्राय इत्याघारौ ओं अग्नये स्वाहा इदमग्नये ओं सोमाय स्वाहा इदं सोमाय इत्याज्यभा
गौ ततः प्राकृतोऽन्वारब्धकर्तृको होमः ओं अन्तरिक्षाय स्वाहा इदमन्तरिक्षाय ओं वायवे स्वाहा इदं वायवे ओं ब्रह्मणे स्वा
हा इदं ब्रह्मणे ओं छन्दोभ्यः स्वाहा इदं छन्दोभ्यः ततः सामान्याहुतयः ओं प्रजापतये स्वाहा इदं प्रजापतये इति मनसा ओं
देवेभ्यः स्वाहा इदं देवेभ्यः ओं ऋषिभ्यः स्वाहा इदमृषिभ्यः ओं श्रद्धायै स्वाहा इदं श्रद्धायै ओं मेधायै स्वाहा इदं मेधायै
ओं सदसस्पतये स्वाहा इदं सदसस्पतये ओं अनुमतये स्वाहा इदमनुमतये ततोऽन्वारब्धकर्तृको होमः तत्राहुत्यनन्तरं स्रु इदं स्वः
वावस्थितहुतशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः ओं भूः स्वाहा इदं भूः ओं भुवः स्वाहा इदं भुवः ओं स्वः स्वाहा एताः महाव्या
हृतयः ओं त्वन्नो अग्ने वरुणस्य विद्वान्देवस्य हेडोऽवयासिसीष्ठाः यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषाँसि प्रमुमुग्ध्य
स्मत् स्वाहा इदमग्नीवरुणाभ्यां ओं स त्वन्नोऽग्नेवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ अवयक्ष्व नो वरुण
ँ रराणो वीहि मृडीकँ सुहवो न एधि स्वाहा इदमग्नीवरुणाभ्यां ओं अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्वमित्त्वमया
असि अया नो यज्ञं वहास्यया नो धेहि भेषजँ स्वाहा इदमग्नये ओं ये ते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः
तेभिर्नो अद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो म
रुद्भ्यः स्वर्केभ्यः ओं उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमँ श्रथाय अथा वयमादित्य व्रते तवानागसो अदितये

३८

त्रकरेण प्रणीतोदकं त्रिः प्रोक्षणीपात्रे निधायानामिकांगुष्ठाभ्यां पवित्रे गृहीत्वा त्रिरुत्पूय प्रोक्षणीपात्रं वामक
रे निधायानामिकांगुष्ठाभ्यां गृहीतपवित्राभ्यां तज्जलं किंचित् त्रिः प्रक्षिप्य प्रणीतोदकेन प्रोक्षणीमभ्युक्ष्य
प्रोक्षणीजलेनासादितवस्तून्यभिषिंच्य अग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रं निदध्यात् ततः आज्यस्था
ल्यामाज्यं निरूप्याधिश्रयणं ततस्तृणं प्रज्वाल्याज्यस्याग्रे श्रपणोपरि प्रदक्षिणं भ्रामयित्वा वह्नौ तत्
क्षिप्य स्रुवं त्रिः प्रतप्य संमार्जनकुशानामग्रैरन्तरतो मूलैर्बाह्यतः स्रुवं संमृज्य प्रणीतोदकेनाभ्यु 15
क्ष्य पुनः प्रतप्य स्रुवं दक्षिणतो निदध्यात् ततः आज्यमग्नेः प्रदक्षिणं कारयित्वावत्तार्य त्रिः प्रोक्ष
णीवदुत्पूयावेक्ष्य सत्यपद्रव्ये तन्निरसनं कृत्वा पुनः पूर्ववत्प्रोक्ष्य पुनरुत्पवनं ततः उत्थायोपयमन
कुशान्वामहस्ते कृत्वा प्रजापतिं मनसा ध्यात्वा तूष्णीमग्नौ घृताक्ताः समिधः प्रक्षिपेत् ततः उपवि
श्य सपवित्रप्रोक्षण्युदकेन प्रदक्षिणक्रमेणाग्निं पर्युक्ष्य प्रणीतापात्रे पवित्रे निधाय पातितदक्षि
णजानुः समिद्धतमेऽग्नौ ब्रह्मणान्वारब्धः स्रुवेणाज्याहुतीर्जुहोति तत्र प्रथमाहुतिचतुष्टये प्रत्या
हुत्यनन्तरं स्रुवावस्थितहुतशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः ओं प्रजापजापतये स्वाहा इदं प्रजा
पतये इति मनसा ओं इन्द्राय स्वाहा इदमिन्द्राय इत्याघारौ ओं अग्नये स्वाहा इदमग्नये ओं सोमा
य स्वाहा इदं सोमाय इत्याज्यभागौ ततोऽन्वारब्धकर्तृको होमः ओं अन्तरिक्षाय स्वाहा इदमन्
तरिक्षाय ओं वायवे स्वाहा इदं वायवे ओं ब्रह्मणे स्वाहा इदं ब्रह्मणे ओं छन्दोभ्यः स्वाहा इदं छ
न्दोभ्यः ओं प्रजापतये स्वाहा इदं प्रजापतये इति मनसा ओं देवेभ्यः स्वाहा ओं ऋषिभ्यः स्वाहा ८

इदं देवेभ्यः

निविशेषः अथ समावर्त्तनं तत्र शुभदिने एकीभूय आचार्य्यस्तास्याभि इति कुमार आचार्यं भाषते 16
तत्र स्वीकृत्य आचार्य्यः ततो ब्रह्मचारिणा आचार्यसन्निहित दक्षिणदिशे उपविष्टे कृतस्नानादिराचा
र्य्यः ततो ब्रह्मचारिणा आचार्य्यसन्निहि ॥ कुशेन हस्तमात्रपरिमितां चतुरस्रां भूमिं परिसमुह्य ता
नेशान्यां परित्यज्य गोमयोदकेनोपलिप्य स्रुवमूलेनोत्तरक्रमेण त्रिरुल्लिख्योल्लेखनक्रमेणोद्धृत्य
जलेनाभ्युक्ष्य कांस्येनाग्निमानीय प्रत्यङ्मुखं निदध्यात् ततः पुष्पचन्दनताम्बूलवासांस्यादाय ॐ
अद्यामुकगोत्रस्य कर्त्तव्यसमावर्त्तनहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मकर्त्तुममुकगो
त्रममुकशर्माणं ब्राह्मणमेभिः पुष्पचन्दनताम्बूलवासोभिर्ब्रह्मत्वेन त्वामहं वृणे इति ब्राह्मणं वृणु
यात् ॐ यथाविहितं कर्म कुर्वीत्यभिधाय ॐ करवाणीति तेनोक्ते ॐ अग्नेर्दक्षिणतः शुद्धमासनं
दत्वा तदुपरि प्रागग्रान्कुशानास्तीर्य्य अग्निं प्रदक्षिणक्रमेण भ्रामयित्वाऽस्मिन्कर्मणि त्वं मे ब्र
ह्मा भवेत्यभिधाय ॐ भवानीति तेनोक्ते ब्रह्माणमुदङ्मुखं तत्रोपवेश्य ततः प्रणीतापात्रं पु
रतः कृत्वा वारिणा परिपूर्य्य कुशैराच्छाद्य ब्रह्मणो मुखमवलोक्याऽग्नेरुत्तरतः कुशोपरि निदध्यात्
ततः परिस्तरणं बर्हिषश्चतुर्थभागमादायाग्नेयादीशानान्तं ब्रह्मणोऽग्निपर्यन्तं नैरृत्याद्वायव्यान्तं अ
ग्नितः प्रणीतापर्यन्तं ततोऽग्नेरुत्तरतः पश्चिमदिशि पवित्रच्छेदनार्थं कुशत्रयं पवित्रकरणार्थं साग्रम
नन्तर्गर्भं कुशपत्रद्वयं प्रोक्षणीपात्रमाज्यस्थाली सम्मार्जनकुशा उपयमनकुशाः समिधस्तिस्रः स्रुवः आ
ज्यं पूर्णपात्रं पवित्रच्छेदनकुशानां पूर्वदिशि क्रमेणासादनीयं ततः पवित्रच्छेदनकुशैः पवित्रे छित्वा सपवि

इदंस्टषिभ्य। ओं श्रद्धायै स्वाहा इदं श्रद्धायै ओं मेधायै स्वाहा इदं मेधायै ओं सदसस्पतये स्वाहा इदं सदसस्पतये ओं
अनुमतये स्वाहा इदमनुमतये ततो ब्रह्म[illegible]णान्वारब्धः जुहुयात् अग्नाकृत दणतये तन्न्हा हुत्वानंतरं स्रुवाव
स्थिताज्यस्य प्रोक्षणीपात्रे प्रक्षेपः ओं भूः स्वाहा इदं भूः ओं भुवः स्वाहा इदं भुवः ओं स्वः स्वाहा इदं स्वः एता महाव्या
हृतयः ओं त्वन्नो अग्ने वरुणस्य विद्वान्देवस्य हेडो अव यासिसीष्ठाः यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वे
षांसि प्रमुमुग्ध्यस्मत् स्वाहा इदमग्निवरुणाभ्यां ओं स त्वन्नो ऽग्ने ऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ अ 17
वयक्ष्व नो वरुणं रराणो वीहि मृडीकं सुहवो न एधि स्वाहा इदमग्नीवरुणाभ्यां ओं अयाश्चाग्ने ऽस्यन
भिशस्तिपाश्च सत्यमित्त्वमयासि अयानो यज्ञं वहास्ययानो धेहि भेषजं स्वाहा इदमग्नये ओं ये ते
शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः तेभिर्नो अद्य सवितोत विष्णुर्विश्वे मुंचन्तु मरुतः स्वर्काः
स्वाहा इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यः ओं उदुत्तमं वरुण पाशमस्मदवा
धमं वि मध्यमं श्रथाय अथा वयमादित्य व्रते तवानागसो अदितये स्याम स्वाहा इदं वरुणाय इति सर्व
प्रायश्चित्तं ओं प्रजापतये स्वाहा इदं प्रजापतये इति मनसा ओं अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृ
ते ततः संस्रवप्राशनं आचम्य ओं अद्य कृतैतत्समावर्तन होमकर्मणि कृताकृतावेक्षणरूपब्रह्मक
र्मप्रतिष्ठार्थमिदं पूर्णपात्रं प्रजापतिदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय दक्षिणां तुभ्यमहं संप्रद
दे इति दक्षिणां दद्यात् ओं स्वस्तीति प्रतिवचनं ततो ब्रह्मग्रन्थिविमोकः पवित्राभ्यां प्रणीताजलेन ओं सुमित्रिया न ने
आप ओषधयः सन्त्विति मंत्रेण [illegible]शिरः सम्मृज्य ओं दुर्मित्रियास्तस्मै सन्तु यो ऽस्मान्द्वेष्टि यं च वयं द्विष्मः

उ॰

१ इति मंत्रेणोपयाम्यां प्रणीताभ्युक्षीकरणं ततः स्तरणाक्रमेणाबर्हिस्तानीयछन्नेनाभिघार्य ॐ देवा गातुविदो गातुं वित्त्वा गातुमित
मनसस्पत इमं देव यज्ञं स्वाहा वाते धाः स्वाहा इति मंत्रेणाबर्हिर्होमः ततो ब्रह्मणान्वारब्धः कर्ता कुर्कर्म ततोऽग्नि
पश्चिमोपविष्टो ब्रह्मचारी उपरिसमूहनं कुर्यात् तत्र घृताक्तशुष्कनिषिद्धेतरेंधनेन पंचाहुतिहस्तेनैव जुहुया
त् ॐ अग्ने सुश्रवः सुश्रवसं मा कुरु ॐ यथा त्वमग्ने सुश्रवः सुश्रवा असि ॐ एवं मां सुश्रवः सौश्रवसं कुरु ॐ यथा
त्वमग्ने देवानां यज्ञस्य निधिपा असि ॐ एवमहं मनुष्याणां वेदस्य निधिपो भूयासं ततः प्रदक्षिणमग्निं वारि
णा पर्युक्ष्य उत्थाय घृताक्तां प्रादेशमितां समिधमादाय जुहुयात् तत्र मंत्रः ॐ अग्नये समिधमाहार्षं बृह
ते जातवेदसे यथा त्वमग्ने समिधा समिध्यसे एवमहमायुषा मेधया वर्चसा प्रजया पशुभिर्ब्रह्मवर्चसेन
समिंधे जीवपुत्रो ममाचार्यो मेधाव्यहमसान्यनिराकरिष्णुर्यशस्वी तेजस्वी ब्रह्मवर्चस्व्यन्नादो भू
यासं स्वाहा ततः समिदंतरहूयमनेनैव क्रमेण मंत्रेणानेनैव क्रमेण प्रत्येकं कृत्वा उपविष्टस्तेनैव क्रमेण
पंचाहुतीर्घृताक्तशुष्कनिषिद्धेतरेंधनेन जुहुयात् ॐ अग्नये सुश्रवः सुश्रवसं मा कुरु ॐ यथा त्वमग्ने सु
श्रवः देवानां यज्ञस्य निधिपा असि एवमहं मनुष्याणां वेदस्य निधिपो भूयासं ततः प्रदक्षिणमग्निं पर्युक्ष्य
संस्पृश्य पाणी प्रतप्य मुखं प्रति मंत्रेणैव मृष्टाति ॐ तनूपा अग्नेऽसि तन्वं मे पाहि ॐ आयुर्दा अग्नेऽस्यायुर्मे दे
हि ॐ वर्चोदा अग्नेऽसि वर्चो मे देहि ॐ अग्ने यन्मे तन्वा ऊनं तन्म आपृण ॐ मेधां मे देवः सविता आ
दधातु ॐ मेधां मे देवी सरस्वती आदधातु ॐ मेधां मे अश्विनौ देवावाधत्तां पुष्करस्रजौ ततः सर्वगा १

सुश्रवा अ
सि एवं मां सु
श्रवः सौश्र
वसं कुरु
ॐ यथा त्वम
ग्ने सुश्रवः ४४

श्चाद्दक्षिणदक्षिणपाणिना स्पर्शः तत्र प्रत्येकं मंत्र ॐ अंगानि च मआप्यायंतामिति सर्वगात्रालंभने ॐ वाक् च मआप्या
यतामिति मुखालंभने ॐ प्राणश्च मआप्यायतामिति नासिकास्पर्शः ॐ चक्षुश्च मआप्यायतामिति च
क्षुषस्पर्शः ॐ श्रोत्रं च मआप्यायतामिति श्रोत्रस्पर्शः ॐ यशोबलं च मआप्यायतामिति मंत्रपाठः त
तो दक्षिणानामिकाग्रगृहीतभस्मना ललाटे ग्रीवायां दक्षिणबाहुमूले हृदि च त्र्यायुषं कुर्यात् यथास (७)
ख्येन मंत्रचतुष्टयं ॐ त्र्यायुषं जमदग्नेः ॐ कश्यपस्य त्र्यायुषं ॐ यद्देवेषु त्र्यायुषं ॐ तन्नोअस्तु त्र्यायुषं त
तो व्यस्तपाणिभ्यां पृथिवीं स्पृशन् प्रथमं वैश्वानरं संबोध्याभिवादयेत् तत्रामुकगोत्रोहममुकप्रवरो
ऽहममुकशर्माहं भो वैश्वानर त्वामभिवादयेत इति प्रकारः ततस्तथैव वरुणं संबोध्याभिवादयेत तथैवाचा
र्यं चाभिवादयेत् ततः आयुष्मान्भव सौम्य इत्याचार्यो ब्रूयात् ततोग्रेरुत्तरतः प्रागग्रान्कुशानास्
तीर्य तदुपरि दक्षिणोत्तरक्रमेण आसादितवारिपूर्णकलशाष्टकं तयेकलशानां पुरतः प्रागग्रेषु कु
शेषु स्थित्वा दे कस्मादाम्रपल्लवेन घटोदकं गृहीत्वा ॐ ये अप्स्वंतरग्नयः प्रविष्टा गोह्य उपगोह्यो
मयूषो मनोहास्खलो विरुजस्तनूदूषुरिंद्रियहातान्विजहामि यो रोचनस्तमिह गृह्णामि इति मंत्रेणात
तः तेन मामभिषिंचामि श्रियै यशसे ब्रह्मणे ब्रह्मवर्चसायेत्यात्मानमभिषिंचति ततो द्वितीयघटस्य
मुदकं पूर्ववद्गृहीत्वा आम्रपल्लवेनाभिषिंचति ॐ येन श्रियमकृणुतां येनावमृशतां सुरां येनाक्ष्याव

मिषिंचतां यद्वाजतं तद्यशः ... तेन ततस्तेनैव क्रमेण तृतीयकलशस्य जलमादाय ओं आपोहिष्ठा मयोभुव
स्तान ऊर्ज्जे दधातन महेरणाय चक्षसे इति मंत्रेणाभिषिंच्य तेनैव मंत्रेण तेनैव क्रमेण चतुर्थकलशस्य
जलमादाय ओं योवः शिवतमो रसस्तस्य भाजयतेहनः उशतीरिव मातरः इति मंत्रेणाभिषिंच्य पंच
मकलशस्य जलं तथैवादाय ओं तस्मा अरंगमामवो यस्य क्षयाय जिन्वथ आपो जनयथा च नः
इति मंत्रेणाभिषिंच्य ततोऽवशिष्टकलशत्रयजलं तथैव प्रत्येकं गृहीत्वा तूष्णीं प्रत्येकमभिषिंचति ततो मे
खलामोचनं शिरोभागेन ओं उदुत्तमं वरुणपाशमस्मदवाधमं विमध्यमं श्रथाय अथा वयमादि
त्य व्रते तवानागसो अदितये स्यामिति मंत्रेण दण्डकृष्णाजिने तूष्णीं भूमौ निधायान्यद्वस्त्रं परिधा
योत्तरीयं च कृत्वा आचम्य बद्धांजलिरादित्यमुपतिष्ठेत ब्रह्मचारी ओं उद्यन्भ्राजभ्रस्नुरिंद्रो मरु
द्भिरस्थात्प्रातर्यावभिरस्थात् दशसनिरसि दशसनिं मा कुर्वाविदन्मागमयोद्यन्भ्राजभ्रस्नुरिंद्रो मरु
रस्थात् दिवायावभिरस्थात् शतसनिरसि शतसनिं मा कुर्वाविदन्मागमयोद्यन्भ्राजभ्रस्नुरिंद्रो
मरुद्भिरस्थात् सायंयावभिरस्थात् सहस्रसनिरसि सहस्रसनिं मा कुर्वाविदन्मागमय इति मंत्रेण ततो दधिला ति
न्वा प्राश्याचम्य नखलोमादि श्मश्रु छेदयित्वा स्नात्वाचम्य प्रादेशमितेनोदुम्बरकाष्ठेन दन्तधावनं ओं अन्नाद्या
य व्यूहध्वं सोमो राजायमागमत् स मे मुखं प्रमार्क्ष्यते यशसा च भगेन च इति मंत्रेण ततो दंतकाष्ठं परं न

ॐ

रित्यज्य आचम्य सुगंधद्रव्येणोद्वर्त्तनानंतरं स्नात्वा द्विराचम्य चंदनं कुंकुमादिना नासिका मुखाद्यालंभनं ओं
प्राणापानौ मे तर्पय ओं चक्षुर्मे तर्पय ओं श्रोत्रं मे तर्पय इति मंत्रेण ततो दक्षिणमुखः पातितवामजानुः
कृतापसव्यो दक्षिणामुखः कुशत्रयतिलजलान्यादाय आकृतेन कुशत्रयोपरि पितॄन् तर्पयेत् ओं पितरः २१
शुंधध्वमिति मंत्रेण ततः आचम्यानुलिप्य जपेत् ओं सुचक्षा अहमक्षिभ्यां भूयासं सुवर्चा मुखेन सुश्रुत्कर्णाभ्यां
भूयासं इति ततोऽहतवस्त्रपरिधानं ओं परिधास्यै यशोधास्यै दीर्घायुत्वाय जरदष्टिरस्मि शतं च जीवामि शरदः
पुरूचि रायस्पोषमभिसंव्ययिष्ये इति मंत्रेण ततः उत्तरीयं ततो यज्ञोपवीतपरिधानं ओं यज्ञोपवीतं परमं पवित्रं
प्रजापतेर्यत्सहजं पुरस्तात् आयुष्यमग्र्यं प्रतिमुंच शुभ्रं यज्ञोपवीतं बलमस्तु तेजः २ इति मंत्रेणाचमनं अथोत्त
रीयं ओं यशसा मा द्यावापृथिवी यशसेन्द्राबृहस्पती यशो भगश्च मा विदद् यशो मा प्रतिपद्यतां इति मं
त्रेण पुष्पग्रहणं ओं या आहरज्जमदग्निः श्रद्धायै कामायैन्द्रियाय ता अहं प्रतिगृह्णामि यशसा च भगेन च इति मं ९।४
६४ त्रेण ततः पुष्पमालापरिधानं ओं यद्यशोऽप्सरसामिन्द्रश्चकार विपुलं पृथु तेन संग्रथिताः सुमनस आबध्नामि
यशो मयि इति मंत्रेण अथोष्णीषेण शिरोवेष्टनं ओं युवा सुवासाः परिवीत आगात् स उ श्रेयान्भवति जायमा
नः तं धीरासः कवय उन्नयंति स्वाध्यो मनसा देवयंत इति मंत्रेण ततः कुंडले परिदधाति ओं अलंकरणम
सि भूयोऽलंकरणं भूयात् इति मंत्रेण ततोंजनं ओं वृत्रस्यासि कनीनकश्चक्षुर्दा असि चक्षुर्मे देहि ततः
आदर्शे आत्मदर्शनं ओं रोचिष्णुरसि मंत्रेण ततश्छत्रग्रहणं ओं बृहस्पतेश्छदिरसि पाप्मनो मामंतर्धेहि

ॐ

११ तेजसोयशसोमामंतनइहि इतिमंत्रेण ततः पञ्चामृतानहो इतिशुष्कानि ॐ प्रतिष्ठस्योवि श्वतोमायानं इतिमंत्रेण ततो
वेणवदंडधारणं ॐ विश्वाभ्योमारिशाभ्यः पारिपाहि सर्वतः इतिमंत्रेण ततः आचार्यपत्सुरो दक्षिणं दद्यात्
ततउत्थाय ॐ मूर्द्धानंदिवो अरतिं पृथिव्या वैश्वानरमृत आजातमग्निं कविं सम्राजमतिथिंजनानामासन्ना
पात्रंजनयंतदेवाः स्वाहा इतिमंत्रेण फलपुष्पसमन्वितं घृतपूर्णं स्रुवेणमाणवककरस्पृष्टेन उत्थाय पूर्णा दक्षिणा ४
हुतिमाचार्यः कुर्यादिति ततउपविश्य स्रुवेणभस्मानीय दक्षिणानामिकाग्रगृहीतभस्मना ॐ त्र्या
युषंजमदग्नेः इतिललाटे ॐ कश्यपस्य त्र्यायुषं इतिग्रीवायां ॐ यद्देवेषु त्र्यायुषं इतिदक्षिणबाहुमू
ले ॐ तन्नोअस्तुत्र्यायुषमितिहृदि इतित्र्यायुषंकुर्यात् अनेनेवक्रमेणकुमारललाटादाविपि
तन्नतन्नोअस्तुत्र्यायुषइत्यस्यस्थानेतत्तेइतिविशेषः ततोदुर्वाक्षतादिग्रहणं इत्युपनयनविधिः सं
र्णः अथोपनयनसामग्रीभाषयालिख्यते ॥ आपा तंडुलानि । रोली । गुड़ मोलि केसर पतासे
पुष्पमाला धूप दीप बीडे २ डुने १ यज्ञोपवीत ६ प्रणीतापात्र २ प्रोक्षणीपात्र २ आज्यस्थाली २
कांस्यपात्रे अग्निस्थापने छायापात्रं मलशी १ कुशाः स्रुवा पलाशसमिधा परातेगोहे पूर्णपात्र २
कुपीनवस्त्र ५ उपरणो ५ धोति २ मृगचर्म २ पलाशदंड गुल्लरकीदातन मेखलामुंजकी मुहाडे
कुंडो १६ नलेर २ पादुके २ पट्टि २ छत्रि १ वेणवदंड १ गुथली १ घृततिलसुपारी दधि अवदेवतांजन
दर्पण मोजावस्त्र मोलि २ उपानह उद्वर्तन रेत दुर्वा चदोआ केसार सुगंध कस्तूरी शुभंभूयात् ।
११

पोपैः २७ मेषूरणायकनंमाः शशिमंदजीवान्नारौ थनेः
मिनरवीस्त्रिवकेनरेंद्रः वक्रासितो शशिसुरेज्यसितार्क
सौम्याहोरास्तुनाल् जुभवोमित्र नःप्रजेशः २८ कर्म
लग्नगतपकेंद्र शायांसमपलेस्थ्यथवाप्रवलस्य शत्रुनी
चमस्तुयान न दशायोक्लिडसंश्रयदशावलिकला २९ गु
रुक्षसितलग्ने समसंस्थकेंद्रे विपतितिस्विसनाथे भो
गिनोजन्मविद्यात् शुभबलयुक्तैः क्रूरमस्थैः पापै
अजनतिथावादस्युः स्वामिनामर्थभाजः ३० इतिश्रीबृह

ज्ञात्वैकेराजयोगाध्याय एकादशः २१ नवदिक्कसवात्रिका
त्रिवेदैर्गुणितार्द्दिविचन्द्रविकल्पनास्य: यदर्कैस्त्रिगुणं
द्वि पल्लकनीमानवयितादिक्रमतोयनन्त्यमासः १ रुद्र
संख्यलेनलंच राश्येः सत्वत्वाख्यजांशकान्स्योमान्
द केन्द्रैः सदलस्युतैर्वर्ज्यैर्द्वितीयास्त्वकेपौकथितोपमानयेत् २
योगात्कर्णज्यास्त्रयनाम्नमनेपथ्याज्ञवजात्इजगोलका
हु॰ यैः केन्द्रोपगामोक्तफलौदत्वाख्यो विनाहूरन्ये न इष्या।
ज्यो॰ कफलैौ २ ख्यासन्नकेऽभवक्त्रदद्ययोर्गराख्योस्वनन्नत्ता।
२१ २१

गेधुणाकंटविहगाः खिवंधैः श्चंगाटकोनवमपंचलग्नसं
स्थैर्लग्नान्यगैर्दलमितिप्रवदंतितज्ज्ञाः ४ शाकटाख्ये
नवकुभाग्यैर्नवनेनहिबुकैर्तनेमैर्यवः कमलेनविभि
श्रमांस्थितैर्वापीनयुह्निकेन्द्रबाह्यगैः ५ सर्वपापा
न्तुस्योगणमयावज्रदण्डः कृताः चतुर्थभवनेस्थशोज्ञानि
तोभवन्तः कथ्यम् ६ केन्द्रकारिप्रगैर्नैलचतुर्गृहगते
ग्रहैः यूपेषुशाक्तिदाणाख्योक्तैः योगैः वज्रकैः क्रमान् ७
नौकूटछत्रचापानितन्हल्लममवंसंस्थितैः ग्रथवज्र

नावांषः प्रोक्तास्त्वन्यार्द्धमंस्थितैः ४ एकोनस्रगनेयर्थान्त्वम
ङःमप्रकृस्त्राश्रितैः षिलप्रादिस्थितैः स्वकमित्याकजिनमसं॥
प्रहः ५ सांख्यायोगाः समसमर्द्धमंस्थैर्हेकायाया हृत्खकी
दाङनीच यायाःकेदारस्य शैलायमं चैतालरूयात्याहूर्य
मक्ताल्लिहायू १० इंर्णिविरूद्यानिरेताध्याविसरस्त्वंमा॥
नीथनीत्वम स्लैलवकुक्लान्यम्कनः वांगःस्थियगश्चानिष्ठ
णानलजः स्वमर्थीभायानिर्जाभुजयाजोबङ्कहःस्वेभा
वैरवसान ११ आश्चर्याकालस्तविफल्लाभवंन्यन्यविमि

ह॰
जा॰
३२

३२

ग्रिनाः मित्रायैलेफलंदध्य रभिद्यालेफलमदाः १२
यज्ञार्थीभावक्ततनमथंहविर्गंदायां नह्यनिभ्कृशक
टजाः सत्कृंजदारः हृतोटनः कलहकाद्धिरणोमदि
छः कृंगादकीचिरमाद्वीक्षयिकाद्विलाये १३
वद्धैनसूर्वर्णवित्तः स्वभगोतिसूरः घोभात्विनो हयवयेस्त
ख्तिनावयोतः विद्यानकीर्त्यासितसौख्यग्याख्यवयेः
वाच्यानन्दस्थिरशीवोनिपिहोनदाना १४ त्यागयान्स
वानक्रानवैरयंजतचयूपेहिंसानिव्धमापिकृतः घारता

कुशालो नीचोऽल्पसः सुखधौतैर्विभूतत्वशाक्तो दंडपियैर्मि
ग्रहितः प्रहयोन्यसुत्निः १५ कौन्पोद्भुतपलसवः कपर्दो
सुनीजः कृटेन्तनलवनबंधनपंचजातः कुक्षोद्भवः स्तजन
सोद्यकोत्नसौत्वः स्तरस्तकोद्भवभवः प्रथमांनासौ
त्वः १६ अथैद्भजः सभाकाननवपः प्रधानसोयालये
मे. नरमतिप्रतिमस्तुभोगी चक्रेनरैडमकरस्थलिरंजिता
मा. श्विनीगोद्भवस्थनिपणः प्रियगीतनन्दनः १७ दानाध्यका
११ यनिस्तः पञ्चपञ्चदाम्निपाकेथनार्जनविपरीलमभ्य ११

बंधुः केंद्रगैः कृषिकरः सबलैर्हयोगपाः शूरः क्षेत्रोः
धनरुचिर्विधनश्च शूले १८ धनविरहितः पापाडीवाग्य
गेन्वथ गोलके विधनमलिनोऽज्ञानोपेतः कुशिल्पल
सोटनः इति निगदिताः योगाः सार्धं फलैर्विहनाभसा
नियतफलदाश्चिन्त्या ह्येते समस्तदशास्वपि १९ इ
ति श्री बृहज्जातके नाभसयोगाध्यायो द्वादशः १२ अथ
धमसमवरिष्ठान्यर्ककेंद्रादिसंस्थे शशिनि विनयवित्त
ज्ञानधीनैपुणानि अहनि निशि च चंद्रे स्वेधिमित्रांशके वा

केनभत्रपङ्कमित हृष्टविन्नवाम्पान्स्त्रीव १ सौम्येःस्म
रातिनिर्वन्धवधिपाग इदेसलासिंव म्रूपसविवचित्तिमा
लनन्म संपन्नसौ।वाविभवाहनं गङ्गुवस्यदीर्घाग्रुवाचि
गानरोगाभयाम्बुजानः २ हिन्नांकेस्वनफानकाश्रुरध्रुगा
स्वानेमा भवस्यर्पदैः श्रीतायोः कथिनोन्यथानवहुभिः
सं. वैमद्रमा व्यौल्लमौ केदेपीनकरेषवाग्रहयुतेनेकमद
जा. मानेषाने के विन्केडनवांगाकेयुववंडलानिमासिद्धा
२५ (नेने विशान्तस्तूषाः स्तनफानकाख्याः वसिष्ठनयंधौरधा २५

प्रभेदः शक्ताविकल्पैः क्रमंषेष्ठाभिनीयनीनेतिवन्निः पु
नरन्यनीतिः ४ स्वयमपिगतिविन्नः याग्निवसन्त
मोवाभवतिहिम्ननफायांधीधनस्थानिमांस्त्र प्रतवग
दप्तरीरः शीलवान्स्यान्तिकीर्त्यविषयसत्ववस्तवेशेनि
ष्टंतस्थानफायामः ५ उत्पन्नभोगसत्वभ्भयधनवाहना 9
द्यास्यागान्विनोधुरधुराभभवः सम्भवः कमहमम
लितद्भः गवितनीचनिस्वः प्रेष्यः खलस्थनयेनरापिवंश
जातः ६ उत्साहयोविधनसाहसवाम्भ[illegible]नः सौम्यः

षष्ठः सुस्वचैनो निधनः कलात्रः जीवोर्कधर्मसप्तमे युक्तस्य
बृ. मृजितस्य कामी भूतः र्वकुधनेत्रिसायोप्रभोक्ता ७ रवावि
जा. भवर्षे निकूलोपभोक्ता रावितनयो रुकुकार्थ हैकृष्णपापोग्राः
२५ श्रद्धे भक्तु ह द्वेषी क्रियागपस्तृजितोर्लिनतनस्थ प्रथमो य
था न्यहृदयस ८ लग्नाद्दतीव वक्रमानस्य माम्ना धर्मको
न्नोस्य गृहे स्व च योपगतैः समस्तैः द्वाभ्यांस्त मोत्वच
लमोत्तनहननाया मन्यो घमत्वविधिफले विद्यमन्त्र
हेन ९ इति श्रीबृहज्जातके वेदयोगाध्याय ३ यो २५

दृष्टाः १२ तिस्मांशुर्जनेहन्तुर्घोषसहितेनोयंत्रापसमकारं
नरं भोमेनागारनेन्दुयेनानिष्णांधीकीर्तिहोत्व्यान्वितस्य
ज्ञां रंवाक्वानि नात्र्युकार्यानित्तस्यकेणरंगाय्रथै लंह
स्वं रविनिनंधानक्रमालंभाणप्रकारेस्तुवा १ होटस्य
सवक्रमपाणमशिवंमातुः स्वकः शष्वी सत्त्वःप्राप्ति
निवाक्यमर्थेनिपुणांसोभाग्यवतीत्यविनम्र विक्रांत
कर्त्तमनाख्यमास्थिरमतिविनेष्वरं सांगिवावस्माणामसि
नाः क्रियादिक्रमालंसार्किः पुनर्भस्रुते २ सत्वादि

स्नेहकृदैव्यवहरतिवाणिगिवाकूयोज्ञामस्मैमोघर्यध्या-
त्मः सजीवेभवातिनरपतिग्रामिविज्ञोहितमोवा गोपोमल्लो
घदत्तः परत्रुवतितिताद्र नकल्लाहरेज्यकुःस्वानोमत्यसं-
धः समभिरेतनयेभपिज्ञेतिंहिनास्य २ सौभाग्यंगच्चगोत्र
हस्यतित्रुतेणीनप्रियान्त्रतविद्यागमीत्रगणाघः स्मि
सू. नमङ्गुनामायापडलेवकः संदिग्धोधनधारवार्दकृत
मा. श्रुकोणाडूकेणभो नेयायमश्चकेवमिनेनगदकृशातो
२९ नकारोगपिवा ५ यसितविनसमागमेत्सवकृर्व ३४

निस्माश्रयसंग्रहवित्तिः भवतियल्लिपिघस्नवित्रा
वलाकथितनफलैः परतोपरे विकल्पाः ५ इति श्रीबृ
हज्जातके द्विग्रहग्रहयोगो नाम चतुर्दशोध्यायः
१४ एकस्थैश्चतुरादिभिर्बलयुतैर्जाताः पृथग्वीर्यगैः
शाक्याजीविकभिक्षुवृद्धचरका निर्ग्रन्थवन्याशिनः
माहेयज्ञगुरुक्षपाकरसित प्राभाकरीनैः क्रमात्प्रव
ज्याबलिभिः समाः परजितैस्तत्स्वामिभिः प्रच्युताः
रविलुप्तकैरदीक्षिता बलिभिस्तद्गतभक्तयो नराः

अभिख्याचितमात्रदीक्षितानिहन्तैर्निहन्तैन्यानिरीक्षितेता
र्थैरि २ जन्मेशोन्यैर्यग्रहदृष्टोर्कसुत्र यचपन्या किंजन्मार्थे
वाबलोनं दीक्षामामोत्पार्किद्रेष्काणसंस्थेभौमार्कांशो
सौरदृष्टेचबंदे ३ स्वरगुरुकशपिहोगस्त्राकिंदृष्ट्वा
हो. धर्मेगुरुदृष्टे नृपतीनांयोगजस्तीर्थकृन्याम नवम
जा. भवनसंस्थेमदकेन्यैरदृष्टे भवतिनरपयोगेदीक्षितः
३० पार्थिवेन्द्रः ४ इतिश्रीबृहज्जातकेप्रव्रज्यायोगापंच
दशः १५ ॐप्रियभूषणभूपाःसुभगोदृष्टोविनीत ३०

मतिमांश्चकृतनिश्चयसत्यारुग्दक्ष: सुखितश्च भरणीषु
१ बह्वाशी परदाररतस्तेजस्वी कृत्तिकासु विख्यात: रो
हिण्यां सत्य शुचि: प्रियंवद: स्थिरमति सुरूपश्च २ चपल
श्चतुरो भीरु: पटुरुत्साही मृगी धनी भोगी शठगर्वित:
चण्ड: कृतघ्न पापहिंस्रश्च रौद्रे ३ दान्त: सुखी सुशीलो
दुर्मेधा रोगभाक्पिपासुश्च अल्पेन च संतुष्ट: पुनर्वसौ
जायते मनुजा: ४ शान्तात्मा सुभग: पंडितो धनी
धर्मसंश्रित: पुष्ये शठ सर्वभक्षपापकृतघ्नश्च भो

ज्ञेयो ५ बहुमलधनो भोगी स्तवपित्स्थमक्रोधी महोद्यमः 16
पित्र्यो प्रियवाग्दाता द्युतिमान्नरो नोन्नयमेव कोप्याप्य ६
सुभगो विद्यामधनो भोगी सुखवान्द्वितीयफलगा
स्यु ७ अन्नहीरश्च पानपो हाग्स्तेकरोहस्ते ७ विद्याव
वमाल्पधरः खलोचनो गतः भवति चित्रायाम् दान्तो वणि
हो॰ क्कुधालुः प्रियवाग्धर्मी स्वातौ ८ ईर्ष्यालुर्लोभी द्युतिमा
जा॰ न्वचनपटुः कलहकृद्विशाखासु ... विदेशवासी
११ क्षुधालुरटनोनुराधासु ९ ज्येष्ठासु न बहुमित्रः संतु २९

शोधर्मकृत्युत्रकोपः स्त्वेमानी धनवान्सुखी नहिं
स्नः स्थिरो भोगी १० इष्टानेदकलत्रो मानी हृष्टसोरुद्
स्वजनदेवे तैर्य्यी विनीतधार्मिक वहुमित्रकृतनुज्ञस्म
गाम्रु ११ श्रीमांश्चवलोत्य नवान्धायथारो धनान्वितः त्वा
नः दाताक्ता शूरगीतप्रियो धनिष्ठा सहधमलब्धः १२ स्फु
टांवाग्म्यसनी विश्रुहासाहसिकः शानभिद्युग्रारा:
भद्रपदासु हिमः स्त्री विजित धनी पडुवदातावः १४ वक्ता
स्त्री प्रज्ञावांजितशत्रुर्धार्मिको द्विनीयास्वःसमस्ताभाः

18

गमगाः सूरः सुवितर्यवान्तौ ॥ २४ ॥ कन्नानाम्नहमस्नाशा
नोलक्षुभाकहिप्रंसुर्दोटनः कामीडर्वलजान्नरास्थिर
थनः सूतोगनावल्लुभः सेग्राज्ञोःऊनवीव्रांकिता
थितामाणीसहोर्थ्योग्रजः शान्यपाणितनलंकितो
निचपलस्तैन्येनिभीरुःक्रिये कंतनः विलगतिःश्वहक
वदनः श्वहास्पपार्श्वोंकिन स्यागीलोग्रासहः प्रभुः
मे. कऊदेवार्कनाथजास्सोथालः स्वैवंधुजनानमतैविक
को. लितः सौभाग्यपरानः हमीदीमात्रिः प्रमदाप्रियः स्त्रि
२५ २५

रक्तहस्तमध्यांतसौख्याभागवि १६ लीलोलःस्वगतोःपा
चारुकपालस्ताम्रनखाःशास्त्रवि हृतःकंचितमूर्ध
जःपद्ममतिहास्येंगितहृतविन् चार्वंगःप्रियवाक्य
भक्ताणांहृविगीतमिथ्यान्नविक्रीवैर्यातिरजितमन्न
ततस्सर्वंदेततीयर्हतो १७ मार्कवअतनगाःसमुन्नतक
टिस्थीनिर्जितःसत्वह्रसैसजःप्रवृत्तालयःस्वयधेनेःसं
युज्यतेवंदवत् ह्रस्वःपीनगलःसमोतिचवंशासास्वा
स्तहस्तसलस्तोयेध्यानारनःस्वेवमसहितेजातःस्म

चविपर्य्ययइति ऋतुमानितिछेदः संक्रांतिश्चपंचपर्वाणि तःपातिनीयाहजनीया तदुक्तंवि
ष्णुपुराणे चतुर्दश्यष्टमीचैवअमावास्याचपूर्णिमा पर्वाण्येतानिराजेंद्र रविसंक्रां
तिरेवच तैलस्त्रीमांससंभोगीचसर्वेष्वेतेषुवैपुमान् विण्मूत्रभोजनंनाम प्रयातिनर
कंनृपेति देशाश्चवर्ज्यास्तत्रैवदर्शिताः चैत्यचत्वरसौधेषुनैवदेवचतुष्पथे नैवश्म
शानोपवनसलिलेषुमहीपते नेष्टेछावायंमतिमान्नरोव्याघ्रपीडितइति स्वदार
निरतइत्यनेन मानसमपिपरदारगमनंनिषिद्धंतथाचवसिष्ठेनएतदपितत्रैवदर्शितं
नास्नातांतुस्त्रियंगच्छेन्नातुरांनरजस्वलां नानिष्टांनप्रकुपितांनाप्रशस्तांनरोगिणीं
नादक्षिणांनान्यकामांनाकामांनान्ययोषितां क्षुत्क्षामांनातिभुक्तांवास्वयंचैतैर्गु
णैर्युतः स्नातःस्रग्गंधधृक्प्रीतोनाध्मातःक्षुधितोपिवा इति तदुक्तमित्यनेनश्रौतंवरंस्मार ८४
यति तथाचश्रुतिः सस्त्रीषुसादग्धपासीददस्येवृत्रहत्यायैतृतीयंप्रतिगृह्णीतेति
ताअब्रुवन्वरंवृणामहाऋत्वियात्प्रजांविंदामहेकामयाविजनितोःसंभवामेति तस्मा
दृत्वियाःस्त्रियःप्रजांविंदंतेकाममाविजनितोःसंभवंतिवारेवृतंह्यासांतदेतत्

पा॰ मा॰ ब्रह्महत्यायै ब्रह्म गृह्णन्सा मलवद्वासा अभवदिति अयमर्थः इंद्रः किल विश्वरूपनामानं
२०५ पुरोहितस्य वधाद् ब्रह्महत्यामुपगतामंजलिना स्वीकृत्य संवत्सरं धृत्वा लोकापवाद
भीतस्तां त्रेधा विभज्य प्रथमभागं वनस्पतिभ्यो वरपूर्वकं दत्वा तृतीयभागदानाय स्त्री
समूहमुपागमत् ता अवरमयाचंत ऋतुकालगमनात् प्रजां लभेमहि आप्रसवमनंता
[illegible] संभवामेति वरं लब्ध्वा तृतीयभागं ब्रह्महत्यायाश्च भागो रजोरूपेण परि
णतः ततः प्रभृति मासिमासि योषिन्मलवद्वाससं पन्नेति याज्ञवल्क्योपि यथाका
मी भवेद्वापि स्त्रीणां वरमनुस्मरन् स्वदारनिरतश्चैव स्त्रियो रक्ष्या यतः स्मृता इति बृह
स्पतिरपि ऋतुकालाभिगमनं पुंसा कार्यं प्रयत्नतः सदैव वा पर्ववर्जं स्त्रीणा ई॰ अभि
मतं हितदिति ऋतुकालाभिगमननियमं केचिदेवमाचक्षते अजातपुत्रस्यैवेयमनि
यमो न तु जातपुत्रस्येति उपपादयंति च तत्र कूर्मपुराणे ऋतुकालाभिगामी स्यात्याव
त्पुत्रोभिजायतइति ऋणापाकरणार्थं हि पुत्रोत्पादनं तथा च श्रुतिः जायमानो वै ब्रा राम
ह्मणस्त्रिभिर्ऋणवान् जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य एष २०५

वाङ्मनसीयः पुत्रीयद्वा ब्रह्म वा दिवासीतीति मंत्रवर्णे पितॄणामस्मिन्संनयत्यमृतत्वं च गच्छ
ति पिता पुत्रस्य जातस्य पश्येच्चेज्जीवतो मुखमिति तदेतदृणापाकरणमेकपुत्रोत्पादनेन
संपद्यते तावता पुत्रित्वसिद्धेः तथा च मनुः ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः पि
तॄणामनृणश्चैव स तस्मात्सर्वमर्हति यस्मिन्नृणं संनयति येन चानंत्यमश्नुते स एव
धर्मजः पुत्रः कामजानितरान्विदुरिति ननु बहुपुत्रत्वमपि क्वचिच्छ्रूयते इमां त्वमिंद्र मी
ढ्वः सुपुत्रां सुभगां कृणु दशास्यां पुत्राना धेहि पतिमेकादशं कृधीति क्रीडंतौ पुत्रैरिति
वरयिं च पुत्रांश्चाददादिति च सत्यं नायं विधिः किंतु बहुपत्यप्रशंसा तस्मादजातपुत्र
स्यैवायमृतुगमननियम इति तदपरे न क्षमंते यज्ञविधेः समानत्वं चैकेन पुत्रेण संप
द्यते न तथाप्यस्ति बहुपुत्रत्वविधिः एतमुपपरमध्यगाशिबं तस्मान्नमत्वमेकोसीति ह
कौषीतकिं पुत्रमुवाच रश्मींस्त्वं पर्यावर्तयात् बहवो वै ते भविष्यंतीति छंदोगैराम्नानात्
तस्य चायमर्थः कौषीतकिर्नाम मुनिः स्वयमादित्यमंडलमेकमेवोपासीन उद्गानं कृ
त्वा तत्फलत्वेन पुत्रमेकं प्रतिलभ्य तमुवाच अहमेतमेकमेवादित्यं ध्यायन्नुद्गानमा

पा॰ मा॰ कार्यं तस्माद्धेयात्मत्वमेकस्यैव पुत्रोऽस्ति एकपुत्रत्वं च न तु शास्त्रं अतस्त्वेकपुत्रतायै रश्मी
२॰६ न्यकृन्तु पास्ति वेलायामावर्त्तयेति महाभारतेपि अपत्यं तु ममैवैकं कुले महति भारत अ
पुत्रत्वैकपुत्रत्वमित्याहुर्धर्मवादिनः चक्षुरेकं च पुत्रश्च अस्ति नास्ति च भारत चक्षुर्नाशे
तनोर्नाशः पुत्रनाशे कुलक्षयः अनित्यतां च मर्त्यानां मत्वा शोचामि पुत्रक संतानस्य
विनाशं तु कामये भद्रमस्तु त इति न तु ज्येष्ठेनैव पुत्रेणानृण्यसिद्धेः निरर्थकं पुत्रांतरोत्पा
दनं तन्न सर्वेषां पुत्राणामानृण्यहेतुत्वात् नहि पुत्रजननमात्रेण पितॄणामानृण्यं किं तर्हि
सम्यगनुशिष्टेन पुत्रेण शास्त्रीयेषु कर्मस्वनुष्ठितेषु पश्चादानृण्यं संपद्यते अत एव वा
जसनेयिब्राह्मणे पुत्रानुशासनविधिः समाम्नातः तस्मात्पुत्रमनुशिष्टं लोक्यमाहुस्त
स्मादेनमनुशासति स यद्यैतेन किंचिदक्ष्णयाकृतं भवति तस्मादेनं सर्वस्मात्पुत्रो मुंच
ति तस्मात्पुत्रो नाम स पुत्रेणैवास्मिंल्लोके प्रतितिष्ठति अस्यायमर्थः अस्ति किंचित्सं
प्रतिपत्तिनामकं कर्म यदा पितुर्मरणावसरो भवति तदा पुत्रमाहूय वेदाध्ययनयज्ञलौ राम
किकव्यापारेषु यद्यत्कर्तव्यं जातं तस्य पुत्रे सर्वस्य पुत्रे संप्रदानं कर्त्तव्यं सेयं संप्रतिप २॰६

त्तिः तस्यांच संप्रवृत्तौ यस्मादनुशिष्ट एव पुत्रोऽधिकारी तस्मादनुशिष्टं पुत्रं परलोकहितमा
हुः शास्त्रज्ञाः अत एव पुत्रानुशासनं कुर्युः पितरः सचानुशिष्टः पुत्रोऽस्य पिता शास्त्री
यं कर्म अग्न्याधानादिकं वक्रत्वेन शास्त्रवैपरीत्येन कृतं भवति एतस्मात्सर्वस्मात् पापादेनं पि
तरं स्वयं शास्त्रीयं कर्म सम्यग्गतति स्तानं मोचयति तस्मात्पुन्नाम्नो नरकात्त्रायत इति व्यु
त्पत्त्या पुत्रो नाम स च पिता स्वयं मृतः पुत्रशरीरे सो वास्मिंल्लोके यथाशास्त्रं कर्म कुर्व
न्नं तिष्ठति एवं च सति बहूनां मध्ये यथावदनुशासनं पुत्रामांद्यादिप्रतिबंधबाहुल्या
व त्कस्यचिदेव संपद्यते अनुशिष्टेष्वपि बहुषु यथावदनुष्ठानं कस्यचिदेव अतो ज्येष्ठः क
निष्ठो वा यस्मादृशः स एवान् एष हेतुः अत एव पुत्रलोभिहितं एष्टव्या बहवः पुत्रा यद्येको
पि गयां व्रजेत् इति दशास्यां पुत्रानित्यादिमंत्राश्चैवं सति बहुपुत्रत्वविधिमुपोद्बलयं
ति यत्तु कामजानितरानुशनसोदाहृतं तदनुशिष्टविषयं तस्माज्ज्ञानपुत्रोऽप्युपायादेव
बहुनोपपत्तीनामतु यौगपद्यक्रमेमाह देवलः यौगपद्येन तीर्थानां विवाहादिक्रमशो
व्रजेत् रक्षणार्थमपुत्रो वा गृह एकमशोपि बेति तीर्थमन्यत्तु यौगपद्येसन्यसबरणीम

पा॰मा॰
२॰७

६

वर्णक्रमेण सवर्णासु विवाहक्रमेण गच्छेत् यदा तु काश्चिद्युगपदुद्वन्त्य इतरास्तदानुपु
त्रामेणैनो गच्छेत् ऋतावपि जातिभेदेनोपगमनकालसंकोचमाह देवलः ब्राह्मण्यादी
द्वादशाहं स्याद्वेदोक्तमृतुधारणं दशाष्टौ षट्च शेषाणां विधीयते तु पूर्वश इति पंचमदि
वसमारभ्य द्वादशाहादिसंख्यावगंतव्या चतुर्थे तु दिवसे गमनं वैकल्पिकं विहितप्रतिषि
द्धत्वात् तथा च नारीनो विदधाति चतुर्थेहनि स्नातायां युग्मासु वा गर्भाधानमिति आ
सो निषेधति चतुर्थे स्नानगम्या हि गंताल्पायुः प्रसूयत इति व्यवस्थितविकल्पश्चा
यमुदितानुदितहोमवत् रजोनिवृत्तौ चतुर्थ्यां विधिः तदनुवृत्तौ प्रतिषेधः तथा च
मनुः रजस्युपरते साध्वी स्नानेन स्त्री रजस्वलेति साध्वी गर्भाधानादिविहितकर्मयो
ग्यत्वार्थः दिनविशेषेणोपगमने फलविशेषोऽभिहितो लिंगपुराणे चतुर्थे स्नानग
म्यान्हि गंताल्पायुः प्रसूयते विद्याहीनं व्रतभ्रष्टं पतितं पारदारिकं दारिद्र्यार्णवोच
मग्नं च तनयं वा प्रसूयते कन्यार्थिनैव गंतव्या पंचम्यां विधिवन्नरः षष्ठ्यां गम्या म
हाभागसत्पुत्रजननी भवेत् सप्तम्यां चैव कन्यार्थी गच्छेत्सैव प्रसूयते अष्टम्यां सर्व

ना॰म
२॰७

ष्टम्यां सर्वसंपन्नं तनयं साऽसूयते नवम्यां दारिकार्थस्याद्दशम्यां पंडितं तथा एका
दश्यां तथा नारीं जनयेत्सैव पूर्ववत् द्वादश्यां पाधर्मतत्त्वज्ञं श्रौतस्मार्त्तप्रवर्त्तकं त्रयोद
श्यां तथा नारीं वर्णसंकरकारिणीं जनयत्यंगनां यस्मान्न गच्छेत्सर्वयत्नतः चतुर्द
श्यां यदा गच्छेत्तु पुत्रं जननी भवेत् पंचदश्यां च धर्मज्ञं षोडश्यां ज्ञानपारगमिति ऋ
तुकालागमने योऽसौ ओभिहितः तस्यापवादमाह व्यासः व्याधितो वंधनस्थो वा प्रवासे
ष्वथ पर्वसु ऋतुकालेषु नारीणां भ्रूणहत्या प्रमुच्यते वृद्धां वंध्यामवृत्तां च मृतापत्या
मपुष्पिणीं कन्यां च बहुपुत्रां च वर्जयेन्मुच्यते भयादिति भ्रूणहतिर्भ्रूणहननं अकारि
न्यायस्यावृतुत्वादिदोषरहितायामृतुकालोपगमनमवश्यंभाविसोमसर्वापि सम्य
क्पालनीया तथाच मनुः पितृभिर्भ्रातृभिश्चैताः पतिभिर्देवरैस्तथा पूज्याः भूष
यितव्याश्च बहुकल्याणमीप्सुना यत्र नार्यस्तु पूज्यंते रमंते तत्र देवताः यत्रैतास्तु न
पूज्यंते सर्वास्तत्राफलाः क्रियाः शोचंति जामयो यत्र विनश्यत्याशु तत्कुलम् न शो
चंति तु यत्रैता वर्द्धते तद्धि सर्वदा जामयो यानि गेहानि शपंत्यप्रतिपूजिताः तानि कृ

पा०मा० ल्याहृतानीव विनश्यंति समंततः तस्मादेताः सदाभ्यर्च्या भूषणाच्छादनाशनैः भूतिकामैर्न्न
२०८ रैर्न्नित्यं सत्कारेणोत्सवेन च संतुष्टो भार्यया भर्त्ता भर्त्रा भार्या तथैव च यस्मिन्नेव कु
ले नित्यं कल्याणं तत्र वै ध्रुवमिति पूज्यत्वं चावृत्ताव्यतिरिक्तासु द्रष्टव्यं अवृत्ताया
स्तु प्राणमात्रयात्राभोजनं तथाह याज्ञवल्क्यः हृताधिकारां मलिनां पिंडमात्रोपजी
विनीं परिभूतामधःशय्यां वासयेद्व्यभिचारिणीमिति यथाऽविन्ना साध्वी भर्त्तव्या
तथैवाऽधिविन्नापि तदाह याज्ञवल्क्यः अधिविन्नापि भर्त्तव्या महदेनोन्यथा भ
वेदिति अधिवेदनं भार्यांतरपरिग्रहः अधिवेदननिमित्तानि याज्ञवल्क्येन दर्शिता
नि सुरापी व्याधिता धूर्त्ता वंध्यार्थघ्न्यप्रियंवदा स्त्रीप्रसूश्चाधिवेत्तव्या पुरुषद्वेषि
णी तथेति सुरापी मद्यपीत्यर्थः सुरापानेनाधिवेदनमात्रं अपितु त्याग एव
तथा महति पातक इति त्यागहेतुत्वेनाभिधानात् पतत्यर्धं शरीरस्य यस्य भार्या सु
रां पिबेदिति वचनाच्च अत एव मनुः मद्यपासाधुवृत्ता च प्रतिकूला च या भवेत् व्या रम २०८
धिता वाधिवेत्तव्या हिंस्रार्थघ्नी च सर्वदेति व्याधिता दीर्घरोगिणी [illegible]

संतीति ५८

चाविकास्यपराणिवचनानि सं चयंति नान्यस्याभिव्यवस्यापितानि उत्क्रम्या
श्रौचस्य कर्माधिकारपरिवर्धित्वात्संध्याद्युपासनस्यापि निवृत्तिः प्राप्तावपवादमा

उपासने तु विप्राणामंगशुद्धिर्हि जायते ॥ ७ ॥

ह उपासने इति उपासनं संध्यावंदनाद्यग्निहोत्राद्यनुष्ठानं तस्मिन्ननुसक्ते तात्का
लिकी शरीरशुद्धिर्भवति तदाह गोभिलः अग्निहोत्रादिहोमार्थं शुद्धिस्तात्कालिकी
स्मृता पंचयज्ञान्न कुर्वीत नशुद्धः पुनरेव स इति यावत्कालेनाग्निहोत्रं निष्पद्यते ता
वदेव शुद्धिर्न तु परं पुलस्त्योपि संध्यामिष्टिं चरुं होमं यावज्जीवं समाचरेत् सूतके
मृतके वापि त्यजन्नाध्छेदधो द्विजः सूतके मृतके चैव संध्याकर्म समाचरेत् मनसो
च्चारयेन्मंत्रान्प्राणायाममृते द्विज इति अंजलिप्रदोपे तु वाचोच्चारणमभिप्रेत्य
पैठीनसिराह सूतके सावित्र्यांजलिं प्रदाय प्रदक्षिणं कृत्वा सूर्यं ध्यायन्नम
स्कुर्यान्मानसोच्चारणस्य मार्जनादिमंत्रेष्वपि सिद्धत्वादंजलेर्विशेषविधा

पा.मा. नैवाह्निकाभिप्रायं यत्तु मनुनोक्तं उभयत्र दशाहानि कुलस्यान्नं न भुज्यते दानं प्रतिग्रहो
२४२ होमः स्वाध्यायश्च निवर्त्तते इति तत्सानिवेश्वदेवादिविषयं तथाह जातूकर्ण्यः पंच
यज्ञविधानं च न कुर्यान्मृत्युजन्मनोरिति यत्तु याज्ञवल्क्येनोक्तं संध्यां पंचमहाय
ज्ञान्नैत्यकं स्मृतिकर्म च तन्मध्ये हापयेदेवमाशौचान्ते तु न क्रियेति तदाह्निक
संध्याभिप्रायं स्मार्त्तकर्मवर्जनं स्वयं कर्तृकविषयं अन्येन तु कारयेदेव तदा
ह बृहस्पतिः सूतके मृतके चैव तथा श्राद्धे भोजने प्रवासादिनिमित्तेषु ताव
येन्नतु हापयेदिति जातूकर्ण्योऽपि सूतके तु समुत्पन्ने स्मार्त्तकर्म कथं भवेत् पिं
स्तं डयज्ञं चरुं होमं असगोत्रेण कारयेदिति मूलवचने विप्रग्रहणं क्षत्रियादेरुपल
क्षणं द्विविधं त्वशुचित्वं कर्मानधिकारलक्षणं अस्पृश्यत्वलक्षणं च तत्राशु
द्धिरित्यनेनैकस्य निवृत्तिरुक्ता चकारेण परस्यापि यथाशावेनात्कालिकी द्वि राम
विधाशुद्धिस्तथा जनने पित्रोरेव विशेषमाह ब्राह्मणानामिति जनने सपि २४२
हो:

हेनयुक्तस्याभ्युपगमात् एवं धर्मस्वरूपे निरूपिते स्याद्व्याकुलत्वेन तद्दुर्भिज्ञत्वं संभव
ति चतुर्णां वर्णानां मध्ये धर्मको विदेरसाधारणधर्माभिज्ञैः कर्त्तव्यविस्तराद्भूरि
सकर्त्तव्यो धर्मो द्विविधः स्थूलः सूक्ष्मश्च मंदमतिभिरपि सुखेन बुध्यमानः श्रौ
चाचमनसंध्यावंदनादिः स्थूलधर्मः शास्त्रपारंगतैः पंडितैरेव बोद्धुं योग्य इत
